SA – 474

**IV Semester B.C.A. Examination, April/May 2015**
**(Freshers and Repeaters) (2012-13 and Onwards)**
**LANGUAGE SANSKRIT – IV**
**Naganandam (IV and V Act) and Comprehension**

Time : 3 Hours                                                                 Max. Marks : 100

***Instructions :*** *1) Answer either in* ***Sanskrit, Kannada*** *or* ***English.***
*2) Questions No.* ***I*** *and* ***VI*** *should be answered in* ***Sanskrit*** *only.*

I. एतेषु **पञ्चदश** प्रश्नानाम् उत्तराणि **संस्कृते** लिखत। **(15×1=15)**

1) जीमूतवाहन: क: ?
2) नागानन्दनाटके कति अङ्का सन्ति ?
3) विश्वावसु: किमर्थं दु:खयति ?
4) वासुकि: क: ?
5) राजसुता कुत्र वर्तते ?
6) गौर्या किम् आज्ञप्तम् ?
7) नागशत्रु: क: ?
8) तार्क्ष्यं दिदृक्षु: शङ्खचूड: काम् अनुसरति ?
9) कस्य कृते मूढा: पापानि कुर्वन्ति ?
10) नागानन्दनाटके प्रधानरस: क: ?
11) मलयवत्या: चेटी का ?
12) गरूडस्य माता का ?
13) खगाधिपस्य हृदयं केन कृतम् ?
14) नागानां अस्थिसंघात: कुत्रास्ति ?
15) श्रीहर्षस्य नाटकानि कति ?
16) कस्या: प्रसादेन जीमूतवाहन: जीवित: ?
17) प्रतीहारस्य नाम किम् ?
18) जीमूतवाहन: कीदृश: नायक: ?
19) सुनन्द: क: ?
20) वृद्धा किमर्थं राजकार्यं न जानाति ?

P.T.O.

II. एकम् अधिकृत्य प्रबन्धं लिखत। (1×12=12)

ಒಂದನ್ನು ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ಬರೆಯಿರಿ.

Write an essay on **any one** of the following.

1) जीमूतवाहनस्य पात्रचित्रणं कुरूत।

ಜೀಮೂತವಾಹನನ ಪಾತ್ರ ಚಿತ್ರಣವನ್ನು ಮಾಡಿ.

Sketch the character of Jimutavahana.

2) नागानन्दनाटकस्य चतुर्थाङ्कम् अधिकृत्य लिखत।

ನಾಗಾನಂದ ನಾಟಕದ ನಾಲ್ಕನೆಯ ಅಂಕವನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.

Write about the Fourth Act of Nagananda.

III. **त्रयाणां** श्लोकानाम् अनुवादं विलिख्य भावं विवृणुत। (3×6=18)

**ಮೂರು** ಶ್ಲೋಕಗಳಿಗೆ ಅನುವಾದ ಸಹಿತ ಭಾವವನ್ನು ವಿವರಿಸಿ.

Translate and explain **any three** slokas.

1) शय्या शाइलमासनं शुचिशिला सद्मद्रुमाणामध:
शीतं निर्झरवारि पानमशनं कन्दा: सहाया मृगा:।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थ घटनावन्ध्यैर्वृथा स्थीयते।।

2) न क्रोडीकरोति प्रथमं यदा जातमनित्यता।
धात्रीव जननी पश्चात् तदा शोकस्य क: क्रम:।।

3) नागानां रक्षिता भाति गुरूरेष यथा मम।
तथा सर्पाशनाकांक्षां व्यक्तमद्यापनेष्यति।।

4) भुक्तानि यौवनसुखानि यशो विकीर्णं
राज्ये स्थितं स्थिरधिया चरितं तपोडपि।
श्लाध्य: सुत: सुसहशान्वयजा स्नुषेयं
चिन्त्यो मया ननु कृतार्थतयाद्य मृत्यु:।।

5) गोकर्णमर्णवतटे त्वरितं प्रणम्य
प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम्।
आदाय तं नखमुखक्षतवक्षसं च
विद्याधरं गगनमुत्पतितो गरुत्मान्।।

IV. **पञ्चानां** ससन्दर्भं विवृणुत। **(5×5=25)**

ಐದನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Explain **any five** of the following with reference to context.

1) सर्वं नृपस्यानुकरोमि वृत्तम्।
2) माता संहर बाष्पवेगमधुना कस्याग्रतो रुद्यते।
3) चरणौ नमाम्यहं ते विद्याधरदेवते गौरी।
4) एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति।
5) हष्टिर्मभ्युपकारिणीव निपतत्यस्यापकारिण्यपि।
6) समाजो नागानां विहरतु महोदन्वति सुखम्।
7) किं निमितं पुनरमी सङ्घातमृत्यवो जाताः।
8) विचित्राणि हि विधेर्विलसितानि।

V. **त्रयाणां** लघुटिप्पणीं लिखत। **(3×5=15)**

ಮೂರನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any three**.

1) मलयवती।
2) जीमूतवाहनस्य मरणवार्ता।
3) गौरी।
4) भरतवाक्यम्।
5) गरुडः।
6) मित्रावसुः।

VI. इमं लघुप्रबन्धं परिशील्य प्रश्नानामुत्तराणि लिखत। 15

सागरे सर्वाणि तीर्थानि सन्ति इति तं पवित्रं मन्यन्ते भारतीयाः। पृथिव्याः मेखला इति कवयः समुद्रं वर्णयन्ति। अस्य जलं क्षारं भवतीति तन्न पिबन्ति। वर्षाकाले सागरस्य जले प्रबलेन वातेन तुङ्गाः तरङ्गाः उद्भवन्ति, घोरः गर्जनारवः उत्पद्यते। सागरे बहुविधाः सत्त्वाः निवसन्ति मत्स्याः कूर्माः मकराश्च। तस्य तले बहुमूल्यानि रत्नानि मौक्तिकानि च तिष्ठन्ति इति कारणात् जनाः तं रत्नाकरः इति कथयन्ति। समुद्रतीरे सामान्यतः शुद्धः प्रशान्तः च पवनः वहति। अतःतत्र जनाः प्रातःकाले सायङ्काले च विहारार्थं सञ्चरन्ति। बालाश्च वालुकासु क्रीडन्ति। एवं सर्वे आनन्दम् अनुभवन्ति।

**प्रश्नाः :**

1) भारतीयाः सागरं किमर्थं पवित्रं मन्यन्ते ?

2) बर्षाकाले सागरः कीदृशः भवति ?

3) सागरे के निवसन्ति ?

4) सागरतले कानि तिष्ठन्ति ?

5) समुद्रतीरे जनाः कदा सञ्चरन्ति ?

---